षष्ठः पाठः

# प्राच्यनगरी सिरपुरम्



सिरपुरं दक्षिणकौशलस्य राजधानी आसीत्। पुरा अस्य नाम श्रीपुरम् इति ख्यातम्। सिरपुरम् रायपुरात् 85 (पञ्चाशीतिः) किलोमीटर दूरे उत्तरपूर्वदिशि महानद्यास्तीरे विद्यते। इयं नगरी पाण्डुवंशीयानां राज्ञां राजधानी आसीत्। अत्र स्थित्वा पाण्डुवंशीयनृपाः दक्षिणकौशलराज्यान्तर्गते शासति स्म। ते कौशलाधिपतिरिति उपाधिना अलङ्कृताः अभवन्।

सिरपुरे अनेकानि दर्शनीयमन्दिराणि सन्ति। तानि मन्दिराणि ख्यातिलब्धानि। महानद्याः तटे गन्धेश्वर महादेवमंदिरम् अतिरमणीयमस्ति। श्रावणमासे तीर्थयात्रिणः वहनिकायां जलं आनयन्ति। तज्जलं शिवं प्रति अर्पयन्ति पूजयन्ति च। मन्दिरस्य बाह्यभित्तेः गन्धर्वदेवीदेवानां, अप्सराणाम् अतिचित्राणि मनांसि रञ्जयन्ति।

सप्तम्यां शताब्द्यां निर्मितं लक्ष्मणमन्दिरं रक्तेष्टिकायां शोभते। अत्र इष्टिकायां अपि मूर्तयः उत्कीर्णाः सन्ति। एतद् मन्दिरं श्रीपुरनरेशस्यशिवगुप्तस्य मात्रा निर्मितम्। तस्याः नाम महाराज्ञी वासटा आसीत्। सा वैष्णवी आसीत्। तया इदम् मन्दिरं स्वपतेः महाराजहर्षगुप्तस्य स्मृत्यां निर्मितम्। इदं मन्दिरं विष्णुमन्दिरमासीत्। कालान्तरे तन्मन्दिरं लक्ष्मणमन्दिरस्य नाम्ना विख्यातम्। लक्ष्मणमन्दिरं निकषा राममन्दिरमस्ति। अस्य मन्दिरस्य स्वभव्यता अद्वितीयास्ति। अत्र बौद्धविहार –स्वास्तिक–विहारयोः अवशेषौ प्राप्तौ। बौद्धविहारे भगवतः बुद्धस्य विशालप्रतिमा प्रतिष्ठिता। यस्य सर्जकः भगवतः बुद्धस्य प्रियशिष्यः बौद्धभिक्षुः आनन्दप्रभुः आसीत्।

सिरपुरस्य भव्य संग्रहालयोऽपि दर्शनीयोऽस्ति। संग्रहालये शैव–वैष्णव–बौद्ध–जैनसम्प्रदायानां विविधाः प्रतिमाः विद्यन्ते। हर्षवर्द्धनस्य काले चीनीयात्री ह्वेनसाङ्गः भारतं समायातः। तेन श्रीपुरस्य श्रीसमृद्धयोः वर्णनं कृतम्। एतत् छत्तीसगढस्य प्रमुखपर्यटनस्थलमस्ति।

प्रतिवर्षे अत्र बुद्धपूर्णिमावसरे सिरपुरमहोत्सवः समायोज्यते। अस्मिन् अवसरे देशविदेशानां अनेके कलानुरागिणः आयान्ति। सिरपुरं छत्तीसगढराज्यस्य प्रसिद्धं धार्मिकं ऐतिहासिकञ्च केन्द्रमस्ति। ऐतहासिकदृष्ट्या सिरपुरं छत्तीसगढराज्यस्य काशी इति अभिधीयते।

## शब्दार्थाः

ख्यातः = प्रसिद्ध हुआ। शासति स्म = शासन करते थे। उपाधिना = उपाधि से। अलङ्कृताः = विभूषित हुये। ख्यातिलब्धानि = प्रसिद्ध है। महानद्यास्तीरे = महानदी के किनारे । वहनिकायाम् = काँवर में। आनयन्ति = लाते हैं। तज्जलम् = तत्+जलम् = उस जल को। अर्पयन्ति = अर्पित

करते हैं। बाह्यभित्तेः = बाहर की दीवाल में। मनांसि = मन को। रक्तेष्टिकायाम् = लाल ईंटों में। उत्कीर्णाः = खुदे हुये। निकषा = समीप। सर्जकः = निर्माता। भव्यसङ्ग्रहालयोऽपि = विशाल सङ्ग्रहालय भी। समायातः = आया। समायोज्यते = आयोजन किया जाता है। कलानुरागिणः = कलाप्रेमी। अभिधीयते = नाम से जाना जाता है।

## अभ्यासप्रश्नाः

**(1) निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए–**

(क) सिरपुरं कस्य राजधानी आसीत् ?
(ख) सिरपुरस्य पुरा नाम किम् आसीत् ?
(ग) तीर्थयात्रिणः केन जलं आनयन्ति ?
(घ) मन्दिरे कानि कानि चित्राणि सन्ति ?
(ङ) महाराज्ञी वासटा कस्य माता आसीत् ?

**(2) रिक्त स्थानों की पूर्ति कीजिए–**

(क) सिरपुरं रायपुरात् ................ दिशि विद्यते।
(ख) सिरपुरे अनेकानि ................ सन्ति।
(ग) तज्जलम् .............. अर्पयन्ति।
(घ) इदम् मन्दिरं .............. स्मृत्यां निर्मितम्।
(ङ) एतत् छत्तीसगढस्य ................ पर्यटनस्थलमस्ति।

**(3) संस्कृत में अनुवाद कीजिए–**

(क) लक्ष्मण मन्दिर लाल ईटों से बना है।
(ख) सिरपुर महानदी के किनारे स्थित है।
(ग) सिरपुर का संग्रहालय दर्शनीय है।
(घ) यह पहले विष्णु मन्दिर था।
(ङ) सिरपुर को छत्तीसगढ का काशी कहा जाता है।

**(4) निम्नलिखित का सन्धि विच्छेद करें –**

तज्जलम्, संग्रहालयोऽपि, नद्यास्तटे, तन्मन्दिरम्।

**(5) निम्नलिखित शब्द रुपों के विभक्ति व वचन लिखिए :–**

| | | विभक्ति | वचन |
|---|---|---|---|
| 1. | राज्ञाम्, | ............ | ............ |
| 2. | मन्दिराणि | ............ | ............ |
| 3. | वहनिकायां | ............ | ............ |
| 4. | पत्युः | ............ | ............ |
| 5. | मन्दिरस्य | ............ | ............ |
| 6. | सङ्ग्रहालये | ............ | ............ |

QAQMAC